Shri Matribhuteshvara Stotram

श्रीमातृभूतेश्वरस्तोत्रम्

Document Information

Text title : Shri Matrribhuteshvara Stotram 02 16

File name : mAtRRibhUteshvarastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-16

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

sanskritdocuments.org

श्रीमातृभूतेश्वरस्तोत्रम्

प्रसन्नवक्त्रमेकदन्तमादिपूज्यमीश्वरं
सुरासुरेन्द्रसेव्यमानपादपद्ममव्ययम् ।
समस्तशोकनाशकारणं सुखप्रदं नृणां
उमासुतं नमामि तं समस्तविघ्नशान्तिदम् ॥ १॥

अजायमानमप्यनेकधा सुजायमानमुं(?)
पुराणमप्यहं युवानमादिकारणं शिवम् ।
अपाणिपादमप्यनेकपादपाणिचक्षुषं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ २॥

अनन्तरूपनामधेयमप्यनामरूपकं
कपालभिक्षमप्यशेषलोकसर्वकामदम् ।
अनाथमप्यशेषलोकनाथमीशमच्युतं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ३॥

अजीवमप्यनन्तजीवरक्षकं सुजीविनं
महान्तमप्यणुं हृदि स्थितं न दृश्यमीडितम् ।
बहिःस्थितं नरामरैः स्वभक्तनेतृगोचरम् ।
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ४॥

उमावचःप्रतिप्रभाषणाज्ञमप्यधीश्वरं
सुवाग्मिनामपि प्रियं जितेन्द्रियोत्तमं रतौ ।
अजय्यमप्युमामुदे सुमेषुणा विनिर्जितं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ५॥

कुरङ्गलोचनाऽगजाविलासहर्षमानसं
गजास्यशौरिबालकेलिदर्शनातिविस्मितम् ।
सुनन्दिबाणभृङ्गिचण्डिरावणादिपूजितं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ६॥

सुमृत्तिकाशिलादिषूधियामपीष्टदायकं (?)
सुपुत्रनीलकण्ठनामधेयवक्तुरिष्टदम् ।
मृगं हरेषुमाहरेति वक्तुराशु मुक्तिदं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ७॥

समस्तलोकदग्धुकामकालकूटभक्षकं
भिषग्वरं त्रिविष्टपस्य मातृभूतमीश्वरम् ।
मृकण्डुसूनुरक्षणाय मृत्युदर्पभञ्जकं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ८॥

अनाथगर्भिणीस्त्रियः शिशोः सुतस्य मे सदा
सुखप्रदं सुमातृवत् शरण्यमेव नान्यथा ।
कृपारसार्द्रमानसेशमच्युतप्रियं शिवं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ ९॥

सुगन्धिकुन्तलाम्बिकासमेतमद्रिवासिनं
समीपवर्तिरङ्गनाथजम्बुकेश्वरप्रभुम् ।
अनाथगर्भिणीवधूसुखप्रसूतिकारकं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ १०॥

इयं समस्तकामदा नवप्रसूनमालिका
नृणामशेषकर्मजन्यशोककक्षपावका ।
सुदर्शनाख्यपण्डितेन भक्तियुक्तचेतसा
विलिख्यते शिवप्रसादलेशलाभवैभवात् ॥ ११॥

या कृपा गर्भिणीत्राणे या कृपा मुनिनन्दने ।
मातृभूतेश्वर क्षिप्रं सा कृपा मयि दीयताम् ॥ १२॥

या कृपा मुनिसन्त्राणे या कृपा कपिनायके ।
या विभीषणरक्षायां सा कृपा मयि दीयताम् ॥ १३॥

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ
(अधश्चोर्ध्वं च रक्षेतां रामकृष्णौ धनुर्धरौ) ॥ १४॥

॥ इति श्रीमातृभूतेश्वरस्तोत्रं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

Shri Matribhuteshvara Stotram

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*